शिव सहस्र नाम स्तोत्रम्-

https://www.chalisa.online

|| शिव सहस्र नाम स्तोत्रम् ||

ॐस्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥ 1 ॥
जटी चर्मी शिखंडी च सर्वांगः सर्वांगः सर्वभावनः ।
हरिश्च हरिणाक्शश्च सर्वभूतहरः प्रभुः ॥ 2 ॥
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानचारी भगवानः खचरो गोचरोऽर्दनः ॥ 3 ॥
अभिवाद्यो महाकर्मा तपस्वी भूत भावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ॥ 4 ॥
महारूपो महाकायो वृषरूपो महायशाः ।
महाऽऽत्मा सर्वभूतश्च विरूपो वामनो मनुः ॥ 5 ॥
लोकपालोऽंतर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रश्च महांश्चैव नियमो नियमाश्रयः ॥ 6 ॥
सर्वकर्मा स्वयंभूश्चादिरादिकरो निधिः ।
सहस्राक्शो विरूपाक्शः सोमो नक्शत्रसाधकः ॥ 7 ॥
चंद्रः सूर्यः गतिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अद्रिरद्{}र्यालयः कर्ता मृगबाणार्पणोऽनघः ॥ 8 ॥
महातपा घोर तपाऽदीनो दीनसाधकः ।
संवत्सरकरो मंत्रः प्रमाणं परमं तपः ॥ 9 ॥

www.chalisa.online

योगी योज्यो महाबीजो महारेता महातपाः ।
सुवर्णरेताः सर्वघ्यः सुबीजो वृषवाहनः ॥ 10 ॥
दशबाहुस्त्वनिमिषो नीलकंठ उमापतिः ।
विश्वरूपः स्वयं श्रेष्ठो बलवीरोऽबलोगणः ॥ 11 ॥
गणकर्ता गणपतिर्दिग्वासाः काम एव च ।
पवित्रं परमं मंत्रः सर्वभाव करो हरः ॥ 12 ॥
कमंडलुधरो धन्वी बाणहस्तः कपालवानः ।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महानः ॥ 13 ॥
स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णिषी च सुवक्त्रश्चोदग्रो विनतस्तथा ॥ 14 ॥
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
सृगाल रूपः सर्वार्थो मुंडः कुंडी कमंडलुः ॥ 15 ॥
अजश्च मृगरूपश्च गंधधारी कपर्द्यपि ।
उर्ध्वरेतोर्ध्वलिंग उर्ध्वशायी नभस्तलः ॥ 16 ॥
त्रिजटैश्चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरोऽथ नक्तं च तिग्ममन्युः सुवर्चसः ॥ 17 ॥
गजहा दैत्यहा लोको लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्मांबरावृतः ॥ 18 ॥
कालयोगी महानादः सर्ववासश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ 19 ॥
बहुभूतो बहुधनः सर्वाधारोऽमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलासकः ॥ 20 ॥
घोरो महातपाः पाशो नित्यो गिरि चरो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यनिंदितः ॥ 21 ॥
अमर्षणो मर्षणात्मा यघ्यहा कामनाशनः ।
दक्शयघ्यापहारी च सुसहो मध्यमस्तथा ॥ 22 ॥
तेजोऽपहारी बलहा मुदितोऽर्थोऽजितो वरः ।
गंभीरघोषो गंभीरो गंभीर बलवाहनः ॥ 23 ॥
न्यग्रोधरूपो न्यग्रोधो वृक्शकर्णस्थितिर्विभुः ।
सुदीक्श्णदशनश्चैव महाकायो महाननः ॥ 24 ॥
विष्वक्सेनो हरिर्यघ्यः संयुगापीडवाहनः ।
तीक्श्ण तापश्च हर्यश्वः सहायः कर्मकालवितः ॥ 25 ॥
विष्णुप्रसादितो यघ्यः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशांतात्मा हुताशनः ॥ 26 ॥
उग्रतेजा महातेजा जयो विजयकालवितः ।

www.chalisa.online

ज्योतिषामयनं सिद्धिः संधिर्विग्रह एव च ॥ 27 ॥
शिखी दंडी जटी ज्वाली मूर्तिजो मूर्धगो बली ।
वैणवी पणवी ताली कालः कालकटंकटः ॥ 28 ॥
नक्शत्रविग्रह विधिर्गुणवृद्धिर्लयोऽगमः ।
प्रजापतिर्दिशा बाहुर्विभागः सर्वतोमुखः ॥ 29 ॥
विमोचनः सुरगणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महाचारी स्तुतस्तथा ॥ 30 ॥
सर्वतूर्य निनादी च सर्ववाद्यपरिग्रहः ।
व्यालरूपो बिलावासी हेममाली तरंगवितः ॥ 31 ॥
त्रिदशस्त्रिकालधृकः कर्म सर्वबंधविमोचनः ।
बंधनस्त्वासुरेंद्राणां युधि शत्रुविनाशनः ॥ 32 ॥
सांख्यप्रसादो सुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कंदनो विभागश्चातुल्यो यघ्यभागवितः ॥ 33 ॥
सर्वावासः सर्वचारी दुर्वासा वासवोऽमरः ।
हेमो हेमकरो यघ्यः सर्वधारी धरोत्तमः ॥ 34 ॥
लोहिताक्शो महाऽक्शश्च विजयाक्शो विशारदः ।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥ 35 ॥
मुख्योऽमुख्यश्च देहश्च देह ऋद्धिः सर्वकामदः ।
सर्वकामप्रसादश्च सुबलो बलरूपधृकः ॥ 36 ॥
सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिधिरूपश्च निपाती उरगः खगः ॥ 37 ॥
रौद्ररूपोंऽशुरादित्यो वसुरश्मिः सुवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥ 38 ॥
सर्वावासी श्रियावासी उपदेशकरो हरः ।
मुनिरात्म पतिर्लोके संभोज्यश्च सहस्रदः ॥ 39 ॥
पक्शी च पक्शिरूपी चातिदीप्तो विशांपतिः ।
उन्मादो मदनाकारो अर्थार्थकर रोमशः ॥ 40 ॥
वामदेवश्च वामश्च प्राग्दक्शिणश्च वामनः ।
सिद्धयोगापहारी च सिद्धः सर्वार्थसाधकः ॥ 41 ॥
भिक्शुश्च भिक्शुरूपश्च विषाणी मृदुरव्ययः ।
महासेनो विशाखश्च षष्टिभागो गवांपतिः ॥ 42 ॥
वज्रहस्तश्च विष्कंभी चमूस्तंभनैव च ।
ऋतुरृतु करः कालो मधुर्मधुकरोऽचलः ॥ 43 ॥
वानस्पत्यो वाजसेनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी सुचारवितः ॥ 44 ॥

www.chalisa.online

ईशान ईश्वरः कालो निशाचारी पिनाकधृकः ।
निमित्तस्थो निमित्तं च नंदिर्नंदिकरो हरिः ॥ 45 ॥
नंदीश्वरश्च नंदी च नंदनो नंदिवर्धनः ।
भगस्याक्शि निहंता च कालो ब्रह्मविदांवरः ॥ 46 ॥
चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च ।
लिंगाध्यक्शः सुराध्यक्शो लोकाध्यक्शो युगावहः ॥ 47 ॥
बीजाध्यक्शो बीजकर्ताऽध्यात्मानुगतो बलः ।
इतिहास करः कल्पो गौतमोऽथ जलेश्वरः ॥ 48 ॥
दंभो ह्यदंभो वैदंभो वैश्यो वश्यकरः कविः ।
लोक कर्ता पशु पतिर्महाकर्ता महौषधिः ॥ 49 ॥
अक्शरं परमं ब्रह्म बलवानः शक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो मनोगतिः ॥ 50 ॥
बहुप्रसादः स्वपनो दर्पणोऽथ त्वमित्रजितः ।
वेदकारः सूत्रकारो विद्वानः समरमर्दनः ॥ 51 ॥
महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥ 52 ॥
वृषणः शंकरो नित्यो वर्चस्वी धूमकेतनः ।
नीलस्तथाऽंगलुब्धश्च शोभनो निरवग्रहः ॥ 53 ॥
स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्संगश्च महांगश्च महागर्भः परो युवा ॥ 54 ॥
कृष्णवर्णः सुवर्णश्चेंद्रियः सर्वदेहिनामः ।
महापादो महाहस्तो महाकायो महायशाः ॥ 55 ॥
महामूर्धा महामात्रो महानेत्रो दिगालयः ।
महादंतो महाकर्णो महामेढ्रो महाहनुः ॥ 56 ॥
महानासो महाकंबुर्महाग्रीवः श्मशानधृकः ।
महावक्शा महोरस्को अंतरात्मा मृगालयः ॥ 57 ॥
लंबनो लंबितोष्ठश्च महामायः पयोनिधिः ।
महादंतो महादंष्ट्रो महाजिह्वो महामुखः ॥ 58 ॥
महानखो महारोमा महाकेशो महाजटः ।
असपत्नः प्रसादश्च प्रत्ययो गिरि साधनः ॥ 59 ॥
स्नेहनोऽस्नेहनश्चैवाजितश्च महामुनिः ।
वृक्शाकारो वृक्श केतुरनलो वायुवाहनः ॥ 60 ॥
मंडली मेरुधामा च देवदानवदर्पहा ।
अथर्वशीर्षः सामास्य ऋकःसहस्रामितेक्शणः ॥ 61 ॥
यजुः पाद भुजो गुह्यः प्रकाशो जंगमस्तथा ।

www.chalisa.online

अमोघार्थः प्रसादश्चाभिगम्यः सुदर्शनः ॥ 62 ॥
उपहारप्रियः शर्वः कनकः काइण्चनः स्थिरः ।
नाभिर्नंदिकरो भाव्यः पुष्करस्थपतिः स्थिरः ॥ 63 ॥
द्वादशस्त्रासनश्चाद्यो यघ्यो यघ्यसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ 64 ॥
सगणो गण कारश्च भूत भावन सारथिः ।
भस्मशायी भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥ 65 ॥
अगणश्चैव लोपश्च महाऽऽत्मा सर्वपूजितः ।
शंकुस्त्रिशंकुः संपन्नः शुचिर्भूतनिषेवितः ॥ 66 ॥
आश्रमस्थः कपोतस्थो विश्वकर्मापतिर्वरः ।
शाखो विशाखस्ताम्रोष्ठो ह्यमुजालः सुनिश्चयः ॥ 67 ॥
कपिलोऽकपिलः शूरायुश्चैव परोऽपरः ।
गंधर्वो ह्यदितिस्ताक्ष्र्यः सुविघ्येयः सुसारथिः ॥ 68 ॥
परश्वधायुधो देवार्थ कारी सुबांधवः ।
तुंबवीणी महाकोपोर्ध्वरिता जलेशयः ॥ 69 ॥
उग्रो वंशकरो वंशो वंशनादो ह्यनिंदितः ।
सर्वांगरूपो मायावी सुहृदो ह्यनिलोऽनलः ॥ 70 ॥
बंधनो बंधकर्ता च सुबंधनविमोचनः ।
सयघ्यारिः सकामारिः महादंष्ट्रो महाऽऽयुधः ॥ 71 ॥
बाहुस्त्वनिंदितः शर्वः शंकरः शंकरोऽधनः ।
अमरेशो महादेवो विश्वदेवः सुरारिहा ॥ 72 ॥
अहिर्बुध्नो निरृतिश्च चेकितानो हरिस्तथा ।
अजैकपाच्च कापाली त्रिशंकुरजितः शिवः ॥ 73 ॥
धन्वंतरिर्धूमकेतुः स्कंदो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥ 74 ॥
प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उदग्रश्च विधाता च मांधाता भूत भावनः ॥ 75 ॥
रतितीर्थश्च वाग्मी च सर्वकामगुणावहः ।
पद्मगर्भो महागर्भश्चंद्रवक्त्रोमनोरमः ॥ 76 ॥
बलवांश्चोपशांतश्च पुराणः पुण्यचइण्चुरी ।
कुरुकर्ता कालरूपी कुरुभूतो महेश्वरः ॥ 77 ॥
सर्वाशियो दर्भशायी सर्वेषां प्राणिनांपतिः ।
देवदेवः मुखोऽसक्तः सदसतः सर्वरत्नवितः ॥ 78 ॥
कैलास शिखरावासी हिमवदः गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥ 79 ॥

www.chalisa.online

वणिजो वर्धनो वृक्शो नकुलश्चंदनश्छदः ।
सारग्रीवो महाजत्रु रलोलश्च महौषधः ॥ 80 ॥
सिद्धार्थकारी सिद्धार्थश्चंदो व्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥ 81 ॥
प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः ।
सारंगो नवचक्रांगः केतुमाली सभावनः ॥ 82 ॥
भूतालयो भूतपतिरहोरात्रमनिंदितः ॥ 83 ॥
वाहिता सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ॥ 84 ॥
धृतिमानः मतिमानः दक्शः सत्कृतश्च युगाधिपः ।
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरः ॥ 85 ॥
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनामः ।
प्रतिष्ठायी महाहर्षो जितकामो जितेंद्रियः ॥ 86 ॥
गांधारश्च सुरालश्च तपः कर्म रतिर्धनुः ।
महागीतो महानृत्तोह्यप्सरोगणसेवितः ॥ 87 ॥
महाकेतुर्धनुर्धातुर्नैक सानुचरश्चलः ।
आवेदनीय आवेशः सर्वगंधसुखावहः ॥ 88 ॥
तोरणस्तारणो वायुः परिधावति चैकतः ।
संयोगो वर्धनो वृद्धो महावृद्धो गणाधिपः ॥ 89 ॥
नित्यात्मसहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च द्विविधश्च सुपर्वणः ॥ 90 ॥
आषाढश्च सुषाडश्च ध्रुवो हरि हणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥ 91 ॥
शिरोहारी विमर्शश्च सर्वलक्शण भूषितः ।
अक्शश्च रथ योगी च सर्वयोगी महाबलः ॥ 92 ॥
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मंत्रः शुभाक्शो बहुकर्कशः ॥ 93 ॥
रत्न प्रभूतो रक्तांगो महाऽर्णवनिपानवितः ।
मूलो विशालो ह्यमृतो व्यक्ताव्यक्तस्तपो निधिः ॥ 94 ॥
आरोहणो निरोहश्च शलहारी महातपाः ।
सेनाकल्पो महाकल्पो युगायुग करो हरिः ॥ 95 ॥
युगरूपो महारूपो पवनो गहनो नगः ।
न्याय निर्वापणः पादः पंडितो ह्यचलोपमः ॥ 96 ॥
बहुमालो महामालः सुमालो बहुलोचनः ।
विस्तारो लवणः कूपः कुसुमः सफलोदयः ॥ 97 ॥

www.chalisa.online

वृषभो वृषभांकांगो मणि बिल्वो जटाधरः ।
इंदुर्विसर्वः सुमुखः सुरः सर्वायुधः सहः ॥ 98 ॥
निवेदनः सुधाजातः सुगंधारो महाधनुः ।
गंधमाली च भगवानः उत्थानः सर्वकर्मणामः ॥ 99 ॥
मंथानो बहुलो बाहुः सकलः सर्वलोचनः ।
तरस्ताली करस्ताली ऊर्ध्व संहननो वहः ॥ 100 ॥
छत्रं सुच्छत्रो विख्यातः सर्वलोकाश्रयो महानः ।
मुंडो विरूपो विकृतो दंडि मुंडो विकुर्वणः ॥ 101 ॥
हर्यक्शः ककुभो वज्री दीप्तजिह्वः सहस्रपातः ।
सहस्रमूर्धा देवेंद्रः सर्वदेवमयो गुरुः ॥ 102 ॥
सहस्रबाहुः सर्वांगः शरण्यः सर्वलोककृतः ।
पवित्रं त्रिमधुर्मंत्रः कनिष्ठः कृष्णपिंगलः ॥ 103 ॥
ब्रह्मदंडविनिर्माता शतघ्नी शतपाशधृकः ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ 104 ॥
गभस्तिर्ब्रह्मकृदः ब्रह्मा ब्रह्मविदः ब्राह्मणो गतिः ।
अनंतरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ॥ 105 ॥
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चंदनी पद्ममालाऽग्{}र्यः सुरभ्युत्तरणो नरः ॥ 106 ॥
कर्णिकार महास्रग्वी नीलमौलिः पिनाकधृकः ।
उमापतिरुमाकांतो जाह्नवी धृगुमाधवः ॥ 107 ॥
वरो वराहो वरदो वरेशः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिंगलः ॥ 108 ॥
प्रीतात्मा प्रयतात्मा च संयतात्मा प्रधानधृकः ।
सर्वपार्श्व सुतस्ताक्श्र्यो धर्मसाधारणो वरः ॥ 109 ॥
चराचरात्मा सूक्श्मात्मा सुवृषो गो वृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वानः सविताऽमृतः ॥ 110 ॥
व्यासः सर्वस्य संक्शेपो विस्तरः पर्ययो नयः ।
ऋतुः संवत्सरो मासः पक्शः संख्या समापनः ॥ 111 ॥
कलाकाष्ठा लवोमात्रा मुहूर्तोऽहः क्शपाः क्शणाः ।
विश्वक्शेत्रं प्रजाबीजं लिंगमाद्यस्त्वनिंदितः ॥ 112 ॥
सदसदः व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्शद्वारं त्रिविष्टपमः ॥ 113 ॥
निर्वाणं ह्लादनं चैव ब्रह्मलोकः परागतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ 114 ॥
देवासुरगुरुर्देवो देवासुरनमस्कृतः ।

www.chalisa.online

देवासुरमहामात्रो देवासुरगणाश्रयः ॥ 115 ॥
देवासुरगणाध्यक्शो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥ 116 ॥
देवासुरेश्वरोदेवो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिंत्यो देवताऽऽत्माऽऽत्मसंभवः ॥ 117 ॥
उद्भिदस्त्रिक्रमो वैद्यो विरजो विरजोऽंबरः ।
ईड्यो हस्ती सुरव्याघ्रो देवसिंहो नरर्षभः ॥ 118 ॥
विबुधाग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ।
प्रयुक्तः शोभनो वर्जैशानः प्रभुरव्ययः ॥ 119 ॥
गुरुः कांतो निजः सर्गः पवित्रः सर्ववाहनः ।
शृंगी शृंगप्रियो बभ्रू राजराजो निरामयः ॥ 120 ॥
अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्शो विश्वदेहो हरिणो ब्रह्मवर्चसः ॥ 121 ॥
स्थावराणांपतिश्चैव नियमेंद्रियवर्धनः ।
सिद्धार्थः सर्वभूतार्थोऽचिंत्यः सत्यव्रतः शुचिः ॥ 122 ॥
व्रताधिपः परं ब्रह्म मुक्तानां परमागतिः ।
विमुक्तो मुक्ततेजाश्च श्रीमानः श्रीवर्धनो जगतः ॥ 123 ॥
श्रीमानः श्रीवर्धनो जगतः ॐ नम इति ॥
इति श्री महाभारते अनुशासन पर्वे श्री शिव सहस्रनाम स्तोत्रम् संपूर्णम् ॥

www.chalisa.online